कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालय, दरभंगा।

दिनांक 13-12-2020

अनिवार्य I उपशास्त्री II वर्ष

संस्कृतसामान्यम् शब्दरूप

"क्विप्" प्रत्ययेन निर्मितः तकारान्त पुल्लिङ्ग शब्दः "भूभृत् ।"

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा - | भूभृत् | भूभृतौ | भूभृतः |
| द्वितीया - | भूभृतम् | भूभृतौ | भूभृतः |
| तृतीया - | भूभृता | भूभृद्भ्याम् | भूभृद्भिः |
| चतुर्थी - | भूभृते | ,, | भूभृद्भ्यः |
| पञ्चमी - | भूभृतः | ,, | ,, |
| षष्ठी - | ,, | भूभृतोः | भूभृताम् |
| सप्तमी - | भूभृति | भूभृतोः | भूभृत्सु |
| सम्बोधन - | हे भूभृत् ! | हे भूभृतौ ! | हे भूभृतः ! |

एवं प्रकारेण सुहृद् शब्दस्य रूपम् भवति । 'क्विप्' प्रत्ययस्य सर्वापहार लोपः भवति ।

13-12-2020

डॉ० निर्मल कुमार झा, सं० प्राचार्य

रा० उ० सं० महावि० सुखसेना, पूर्णियाँ

13-12-2020

शास्त्री

साहित्यम् ।

Page No.:
Date: / /

## छन्दालङ्कारविवेचनम् ।

"मधुरया मधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया ।
मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे ॥"

छन्दनिर्णयः →
प्रस्तुतस्य पद्यस्य प्रत्येके चरणे द्वादशाक्षराः सन्ति ।
एतत् पद्यं जगतीजात्याः अन्तर्गतमस्ति ।
पद्ये यगणादिक्रमः एवंप्रकारेणास्ति →

मधुरया मधुबोधितमाधवी –
। । । ऽ । । ऽ । । ऽ । ऽ
नगण भगण भगण रगण

मधुसमृद्धिसमेधितमेधया ।
। । । ऽ । । ऽ । । ऽ । ऽ
नगण भगण भगण रगण

यस्य प्रतिचरणं नगणभगणौ, भगणरगणौ च तद् वृत्तं
द्रुतविलम्बितं नाम । लक्षणमस्ति →
"द्रुतविलम्बितमाह नभौ भरौ ।"

अलङ्कारविवेचनम् → अनुप्रासः अलङ्कारः ।

"अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत् ।"

[signature] 13-12-2020

डॉ० निर्मलकुमार झा, (स० प्राचार्यः) ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

13-12-2020

संस्कृतसामान्यम् । उपशास्त्री I

अनिवार्यप्रथमपत्रम् ।

हिन्द्यानुवादं कुरुत ।

आश्विने शुक्लपक्षे प्रतिवर्षं दुर्गां पूजयन्ति भारतवासिनः। विशेषेण भारतदेशस्य पूर्वस्यां, दक्षिणस्यां दिशि, बंग, असम, अरुणाचल, बिहारादिषु राज्येषु अयं महोत्सवः उत्साहेन प्रवर्तते । देवासुरसंग्रामे महिषासुरेण भयंकरं युद्धं प्रवृतम् । तस्मिन् विजयार्थं सर्वे देवाः मिलित्वा संयुक्तां शक्तिं निर्माय युद्ध्यन्त । अतः इयं पूजा शक्तिपूजापि कथ्यते । रामरावणयोः युद्धे भगवान् रामः शक्तिसञ्चयार्थं शक्तिपूजामकरोत् ।

हिन्दी→

भारतवासी आश्विन शुक्लपक्ष में प्रतिवर्ष दुर्गा की पूजा करते हैं। विशेषकर भारत देश की पूर्व दिशा में, दक्षिण दिशा में, बंगाल, असम, अरुणाचल, बिहार आदि राज्यों में यह महोत्सव (पर्व) उत्साह पूर्वक (उल्लास से) होता है। देव-दानव युद्ध में महिषासुर द्वारा भयंकर युद्ध किया गया। उस पर विजय पाने हेतु सभी देवताओं ने मिलकर संयुक्त शक्ति का निर्माण कर युद्ध किया। अतः यह पूजा शक्तिपूजा कहलाती है। राम-रावण युद्ध में भगवान् राम ने शक्ति संग्रह हेतु शक्ति की पूजा की।

13-12-2020

डॉ० निर्मल कुमार झा (स० प्राचार्यः)।
रा०उ० सं० महावि० सुखसेना, पूर्णियाँ।